सुभाषित व्याकरण - 9

Subhashit Grammar - 9

Compiler: Kishore Nayak
Editor: Padmakar Gangatirkar

शुक्रवार, माघ, शुक्ल प्रतिपदा १९४२, शर्वरी संवत्सर

का ते कांता कस्ते पुत्रः, संसारोऽयं अतीव विचित्रः।
कस्य त्वं वा कुत अयातः तत्त्वं चिन्तय यदिदं भ्रातः ॥३११॥ -शंकराचार्य भजगो. स्तोत्र

भ्रातः, का ते कांता (अस्ति) ?, कः ते पुत्रः (अस्ति)? त्वम् कस्य (असि) ? वा कुतः अयातः (असि) ?
यद् इदम् तद् त्वम् चिन्तय। अयम् संसारः अतीव विचित्रः (अस्ति)।

Oh brother, who is your beloved (wife)? Who is your son? You belong to whom? Or where did you come from ? What is this, that you ponder over? This world is very strange, indeed!

भ्रातः-सं. वि. ए. व of भातृ-brother, का (किम्)-who & कांता- beloved, mistress, wife in general- both- स्त्री. लिं. प्र. वि. ए. व., त्वम्-प्र. वि. ए. व. & ते -ष. वि. ए. व. of युष्मद्-you, कः (किम्), पुत्रः-son, संसारः- world, विचित्रः- strange & अयम् (इदम्)- he -all पु. लिं. प्र. वि. ए. व. कस्य-whose ष. वि. ए. व. of किम् , वा- अव्यय- or, and, कुतः (कुतस्)-अव्यय- from where, whence, अयातः -पु. लिं. प्र. वि. ए. व. of अयात-came, brought, arrived- क. भू. धा. वि. of आ+या (या-याति २ ग. प. प. to go, walk), यद्-what, तद्- that & इदम् -this, it -all न. लिं. प्र. वि. ए. व., चिन्तय-आज्ञार्थ द्वि. पु. ए. व. of चिन्त्-चिन्तयति-ते १० ग. उ. प. to think, ponder over. अतीव-अव्यय- exceedingly, very much.

Similar meaning shloka as above:
कस्त्वं कोऽहं कुत आयातः, का मे जननी को मे तातः।
इति परिभावय सर्वमसारम्, विश्वं त्यक्त्वा स्वप्न विचारम् ॥...... शंकराचार्य

आशा नाम मनुष्याणां, काचिदाश्चर्यशृङ्खला ।
यया बद्धाः प्रधावन्ति, मुक्तास्तिष्ठन्ति पङ्गुवत् ॥३१२॥ - महासुभाषित संग्रह

मनुष्याणाम् आशा नाम काचित् आश्चर्य-शृङ्खला (भवति)।
यया बद्धाः प्रधावन्ति, (यया) मुक्ताः पङ्गुवत् तिष्ठन्ति।

For men, desire (hope) is the name of some strange binding chain ! Those tied by it, keep running, but those who are free from it, sit as if they are limp.

मनुष्याणाम् -पु. लिं. ष. वि. ब. व. of मनुष्य-human, man, आशा (स्त्री लिं.)-desire, hope नाम-अव्यय-named, called, काचित्- 'some what', 'a little' आश्चर्यशृङ्खला- strange chain (आश्चर्याणाम् शृङ्खला- ष. तत्पुरुष स)-स्त्री. लिं. प्र. वि. ए. व., यया-by which -स्त्री. लिं. तृ. वि. ए. व. of यद् , बद्धाः- tried up, bound & मुक्ताः -set free-both -पु /स्त्री लिं. प्र. वि. ब. व., प्रधावन्ति-

run fast & तिष्ठन्ति-stand-both वर्त. तृ. पु. ब. व. of प्र+धाव् (धाव्-धावति १ ग. प. प. to run) & स्था-तिष्ठति १ ग. प. प. to stand, to stay at place. पङ्गुवत्- like limp, वत्-अव्यय-an affix added to nouns or adjctv to denote 'likeness' , 'resemblance'.

न जातु कामः कामानामुपभोगेन शाम्यति |
हविषा कृष्णवर्त्मेव पुनरेवाभिवर्धते ॥ ३१३ ॥ -मनुस्मृति, अ-२

पाठभेद (Alternate) : कृष्णवर्त्मेव =धूमवर्त्मेव & पुनरेवाभिवर्धते=भूयः एवाभिवर्धते

हविषा कृष्णवर्त्मा इव (धूमवर्त्मा इव) जातु, कामः, कामानाम् उपभोगेन, न शाम्यति, पुनः एव अभिवर्धते (भूयः एव अभिवर्धते) ॥

The sacrificial offerings to the smoky fire keep it burning vigorously at any time. Similarly, the desire does not calm down by enjoyment of sensual pleasures but it grows still more and more again!

हविषा-तृ. वि. ए. व of हविस्-an oblation or an offering like ghee to continue the fire, कृष्णवर्त्मा/धूमवर्त्मा- प्र. वि. ए. व. of कृष्णवर्त्मन्/धूमवर्त्मन्- कृष्ण:(धूम:) वर्त्मन यस्य अस्ति स:- बहुव्रीहि स. A smoky Fire (वर्त्मन्- way, road, track), इव-like, similar to & जातु -possibly, at any time, perhaps-both अव्यय, कामः प्र. वि. ए. व. & कामानाम् -ष. वि. ब. व. of काम-desire, sensual enjoyment, lust, उपभोगेन-तृ. वि. ए. व of उपभोग- satisfaction, enjoyment, fulfilment, न-no, not, शाम्यति-वर्त. तृ. पु. ए. व. of शम्-४ ग. प. प. to be calm, quiet, tranquil, पुनः (पुनर्)/ भूयः (भूयस्)- both अव्यय- again, once more, एव-अव्यय-like, similar to, अभिवर्धते--वर्त. तृ. पु. ए. व. of अभि+वृध्- to grow, increase (वृध्-वर्धते १ ग. प. प. -to grow.)

वेदान्तवाक्येषु सदा रमन्तो
भिक्षान्नमात्रेण च तुष्टिमन्तः |
विशोकमन्तःकरणे चरन्तः
कौपीनवन्तः खलु भाग्यवन्तः ॥ ३१४ ॥ -शंकराचार्य- स्तोत्र
पा. भे: 3rd line- विशोकमन्तःकरणे चरन्तः = अशोकवन्तः करुणैकवन्तः

(ये) कौपीनवन्तः वेदान्त-वाक्येषु सदा रमन्तः (सन्ति), भिक्षान्न-मात्रेण च तुष्टिमन्तः (सन्ति), अन्तःकरणे विशोकम् चरन्तः (अशोकवन्तः करुणैकवन्तः) (सन्ति), ते खलु भाग्यवन्तः (भवन्ति)॥

Those (ascetics), clad in loincloth, who revel always in the words of the Vedantic texts, satisfy themselves by the food obtained by alms and move about without any sorrow in the heart (without any sorrow and full of compassion) and are truly blessed indeed.

वेदान्तवाक्येषु-स. वि. ब. व. of वेदान्तवाक्य, वेदान्त-an Upanishad, ultimate scope of Veda, वाक्य-word, sentence, saying, syllogism (in logic)-वेदान्तस्य वाक्यम्- ष. तत्पुरुष स., सदा-अव्यय-always, रमन्तः, तुष्टिमन्तः, चरन्तः, कौपीनवन्तः & भाग्यवन्तः all प्र. वि. ब. व. of रमत्-enjoying, reveling , चरत् -moving, walking-both वर्त. का. वा. धा. सा. वि of रम्-रमते १ ग. आ. प. to be pleased, rejoice, & चर्-चरति १ ग. प. प. to walk,, move, go about, तुष्टिमान् -feeling contended (तुष्टिः-satisfaction, contentment- तुष्टिम् मन्यते इति-उपपद तत्पुरुष स.) , कौपीनवान् -having loincloth & भाग्यवान्-fortunate, blessed, भिक्षान्नमात्रेण-तृ. वि. ए. व. of भिक्षान्नमात्र (भिक्षान्न- food obtained by alms/begging, मात्र-adjctv- an affix added to noun, in the sense of 'merely, 'as much as'), च-and, अन्तःकरणे-स. वि. ए. व. of अन्तःकरण-heart, mind विशोकम्- विना शोकम्- अव्यय पूर्वपद कर्मधारय -without sorrow, विना - अव्यय-without, except खलु-अव्यय-indeed, surely

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥ ३१५ ॥ -भ. गीता ६.५

आत्मानम् आत्मना उद्धरेत् । आत्मानम् न अवसादयेत् । आत्मा एव हि आत्मनः बन्धुः (अस्ति)। आत्मा एव आत्मनः रिपुः (भवति) ॥

One should uplift and not degrade himself. He, himself is his friend (if he uplifts himself) and he himself is his enemy (if he downgrades himself).

आत्मानम् -द्वि. वि. ए. व., आत्मना -तृ. वि. ए. व., आत्मा-प्र. वि. ए. व., आत्मनः -ष. वि. ए. व. of आत्मन्- पु. लिं. -self, soul, individual, oneself, उद्धरेत् -विध्यर्थ तृ. पु. ए. व. of उद्-धृ- to lift, to save, to raise (धृ-धरति १ ग. प. प. to hold, carry, bear) अवसादयेत् -अव+सद्- प्रयोजक -विध्यर्थ तृ. पु. ए. व - to fail, to become disheartened, to perish (सद्-सीदति ६ ग. प. प. to sit, sit down, recline), एव-just, just so & हि- indeed, surely -both-अव्यय, बन्धुः- brother, friend & रिपुः - enemy-both प्र. वि. ए. व.

कायः संनिहितापायः सम्पदः पदमापदाम् ।
समागमाः सापगमाः सर्वमुत्पादि भङ्गुरम् ॥३१६॥ -हितोपदेश

कायः संनिहित अपायः (अस्ति)। सम्पदः आपदाम् पदम् (भवति)। समागमाः स-अपगमाः (सन्ति) । उत्पादि सर्वम् भङ्गुरम् (अस्ति) ॥

The body is subject to (eventual) loss. Wealth is source of troubles. All unions are followed by partings. Everything that is born is destined to die.

कायः - body & अपायः -loss, injury, going away-both-पु. लिं. प्र. वि. ए. व., संनिहित- contiguous, ready, close, being in-क. भू. धा. वि. of सं+नि+हि (हि-हिनोति ५ ग. प. प. to cast, send), सम्पदः (संपद्)-wealth, समागमाः -unions, meetings & सापगमाः -followed by partings -अपगम -going away, departing, falling off, स- अव्यय-prefix, compounded with noun, indicates 'with', 'accompanying'-all पु. लिं. प्र. वि. ब. व., आपदाम् -ष. वि. ब. व. of आपद् (स्त्री. लिं.) -Danger, calamity, पदम् -cause, abode, source, seat, भङ्गुरम्- adjctv- transient, perishable, उत्पादि- स. वि. ए. व. of उत्पादिन् -produced, born, सर्वम्- pronominal adjctv-all, entire, complete

यावत् स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो,
यावच्चेन्द्रियशक्तिरप्रतिहता यावत् क्षयो नायुषः |
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्,
संदीप्ते भवने हि कूपखननं प्रत्युद्यमः कीदृशः ||३१८||- भतृहरि वै. शतक

यावत् इदम् शरीरम् स्वस्थम् अरुजम् (अस्ति), यावत् जरा दूरतः (अस्ति), यावत् च इन्द्रिय-शक्तिः अप्रतिहता (अस्ति), यावत् आयुषः न क्षयः (भवति), तावत् एव विदुषा आत्मश्रेयसि महान् प्रयत्नः कार्यः (अस्ति)। संदीप्ते भवने हि कूपखननम् कीदृशः प्रत्युद्यमः (अस्ति)

When the body is healthy and free from ailments, when the old age is far away, when the physical strength is not diminished, when life is not old yet, indeed at that time, the wise should make great efforts to improve the Body and Self. What is the wisdom in digging a well when the house is on fire ?

यावत् -till such time, so long as & तावत्- till that time, in the mean-while, -both अव्यव, इदम् (न. लिं)-this, शरीरम् -(न. लिं) body, अरुजम् (न. लिं)-without sickness (न रुजम् -नञ्तत्पुरुष स.), स्वस्थम्-(न. लिं) - healthy, जरा (जरस्)-old age, infirmity, दूरतः (दूरात्) - at a distance, far away, इन्द्रियशक्तिः (स्त्री. लिं.)-Strength of bodily organs (इन्द्रियाणाम् शक्तिः ष. तत्पुरुष स.), प्रतिहता-(स्त्री. लिं.) struck, beaten- अप्रतिहत- नञ्तत्पुरुष स -प्रतिहत- क. भू. धा वि. of प्रति+ हन्-(हन् -हन्ति २ ग. प. प. -- to kill, destroy), आयुषः (आयुस्-न. लिं.)- duration of life, age, क्षयः - lost, diminished, प्रयत्नः- effort, कीदृशः (कीदृश्)-of what kind

or sort ?, कार्यः - to be done (कार्य, कृत्य,कर्तव्य, करणीय - क. वि. धा. सा. विशेषण of कृ - करोति-कुरुते ८ ग. उ. प. to do, make), महान् -great, big -all in प्र. वि. ए. व., विदुषा- by the wise, learned -पु. लिं. तृ. वि. ए. व. of विद्वस्-wise, learned (विद्वान्-पु. लिं, विदुषी-स्त्री. लिं, विद्वत्-न. लिं), च-and न-no, not, एव-अव्यव-just, just so, आत्मश्रेयसि-स. वि. ए. व. of आत्मश्रेयस्- आत्म-self, श्रेयस्-merit, good, happiness (आत्मनः श्रेयस् -ष. तत्पुरुष स.), संदीप्ते & भवने-स. वि. ए. व. of संदीप्त- burning -क. भू. धा वि. of सं+दीप्- (दीप् -दीप्यते ४ ग. आ. प. blaze) & भवन-house, building, हि -अव्यव--indeed, surely, कूपखननम् -द्वि. वि. ए. व. of कूपखनन-कूपस्य खननम्-ष. तत्पुरुष स., प्रत्युद्यमः-प्रति+उद्यमः -effort against, counterpoise

मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम्॥३१७॥-मैत्रायणि उपनिषद् ६.३४

मनः एव मनुष्याणाम् बन्धमोक्षयोः कारणम् (भवति)। विषयासक्तम् (च) बन्धाय (कारणम् अस्ति) , निर्विषयम् (च) मुक्त्यै (कारणम् अस्ति), इति स्मृतम् ॥

For human beings, (their) mind alone is the cause, either for entanglement or for liberation. It is thought that the addiction to sensual objects is the cause for entanglement and detachment from sensual objects is the cause for liberation.

मनुष्याणाम् -पु. लिं. ष. वि. ब. व. of मनुष्य-human being, mortal, मनः -न. लिं. प्र. वि. ए. व. of मनस्-mind, एव-अव्यय-alone, only, just, बन्धमोक्षयोः -ष. वि. द्वि. व. of बन्धमोक्षम्- बन्धम्-entanglement, binding, मोक्षम् -liberation (बन्धम् च मोक्षम् च -द्वंद्व स.), कारणम्-cause, reason, विषयासक्तम्- प्र. वि. ए. व. of -विषयासक्त -विषयेषु आसक्त -स. तत्पुरुष स. विषय-sensual object, आसक्त -stuck, addicted-क. भू. धा. वि. of आ+संज् (संज्-सजति १ ग. प. प. to stick to, adhere to, बन्धाय & मुक्त्यै- both च. वि. ए. व. of बन्ध (पु. लिं.) -binding, entanglement & मुक्ति (स्त्री. लिं.)- Freedom, liberation, निर्विषयम्- प्र. वि. ए. व. of - निर्विषय-absence of sensual object, स्मृतम्- said, considered-क. भू. धा. वि. of स्मृ-स्मरति १ ग. प. प. to remember, consider, call upon.

अक्षरावगमलब्धये यथा स्थूलवर्तुलदृषत्परिग्रहः।
शुद्धबुद्धपरिलब्धये तथा दारुमण्मयशिलामयार्चनम् ॥ ३१९ ॥

यथा अक्षर-अवगम-लब्धये, स्थूल-वर्तुल-दृषत्-परिग्रहः (कुर्वन्ति), तथा शुद्धबुद्ध-परिलब्धये दारु-मृण्मय-शिलामय-अर्चनम् (कुर्वन्ति) ॥

Like, big and round stones are used to familiarise with identification of alphabet, in the same way wood, clay and stone (idols) are used for worship to realise the presence of true supreme spirit (परब्रह्मन्).

यथा -as, in the manner, तथा- thus, in that manner-both अव्यव, अक्षर-alphabet, अवगम-understanding, लब्धये -स्त्री. लिं. च. वि. ए. व. of लब्धि:- acquirement, gaining, अक्षराणाम् अवगमः- अक्षरावगमः- ष. तत्पुरुष स., अक्षरावगमम् लब्धि: -अक्षरावगमलब्धि - द्वि. तत्पुरुष स., स्थूल-big & वर्तुल-round, दृषद् (स्त्री. लिं.)-stone, परिग्रह: -taking, holding, स्थूल: च वर्तुलः च - स्थूलवर्तुलः द्वंद्व स, स्थूलवर्तुलाः दृषदः - स्थूलवर्तुलदृषदः उपपद तत्पुरुष स., स्थूलवर्तुलदृषदानाम् -परिग्रह: - स्थूलवर्तुलदृषत्परिग्रहः -ष. तत्पुरुष स., शुद्ध - pure, true, बुद्ध- enlightened, realised, शुद्धः च बुद्धः च -शुद्धबुद्धः-द्वंद्व स, शुद्धबुद्धम् परिलब्धि: -शुद्धबुद्धपरिलब्धि- द्वि. तत्पुरुष स दारु-wood, मृण्मय- of clay,-शिलामय- of stone, अर्चनम् -worship, दारु च मृण्मयः च शिलामयः च-दारुमृण्मयशिलामयः -द्वंद्व स, दारुमृण्मयशिलामयानाम् अर्चनम् - दारुमण्मयशिलामयार्चनम् - ष. तत्पुरुष स.

अदेशस्थो हि रिपुणा स्वल्पकेनापि हन्यते।
ग्राहोऽल्पीयानपि जले गजेन्द्रमपि कर्षति॥३२०॥ -हितोपदेश-४.४५

अदेशस्थः स्वल्पकेन अपि रिपुणा हि हन्यते। ग्राहः, अल्पीयान् अपि , जले गजेन्द्रम् अपि कर्षति॥

Even a weak enemy defeats a (strong) one, who is in the wrong place. Even a small crocodile drags the lord of elephants, if he is the water.

This refers to a famous story in Purana known as गजेन्द्रमोक्ष. A mighty elephant was a devout Bhakt of Vashnu. His leg was caught by a crocodile in marshy water and was being dragged into it. He picks up a lotus from the pond, offers it to the Lord and prays for his relief. The Lord rushes to set him free.

अदेशस्थः -प्र. वि. ए. व. of अदेशस्थ- देश-place, country, न देशः -अदेशः-wrong or bad place, नञ्तत्पुरुष स.- अदेशे तिष्ठति इति - अदेशस्थ- उपपद तत्पुरुष स., स्वल्पकेन & रिपुणा -तृ. वि. ए. व. of स्वल्पक-adjctv-very small & रिपु- enemy, हि-अव्यव-indeed, even, surely, अपि-अव्यव-also, and, even, हन्यते-gets defeated -कर्मणि. प्रयोग तृ. पु. ए. व. of हन् -हन्ति २ ग. प. प. to kill, strike down, destroy, जले- स. वि. ए. व. of जलम् (न. लिं.)- Water, अल्पीयान् & ग्राहः - both -प्र. वि. ए. व. of अल्पीयस् -very small, smaller & ग्राह-crocodile, गजेन्द्रम् -द्वि. वि. ए. व. of गजेन्द्र-lord of elephants- गजानाम् इन्द्रः - षष्ठी तत्पुरुष स., कर्षति-वर्त. तृ. पु. ए. व.

of कृष्-१ ग. प. प. to draw, drag, pull (कृष्-कृषति-ते ६ ग. उ. प. to plough, to make furrows.

आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः।
क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम् ॥ ३२१ ॥ - सुभाषितरत्न भाण्डागारं

आदानस्य, प्रदानस्य, कर्मणः कर्तव्यस्य च क्षिप्रम् (कुर्यात्) ।) कालः अक्रियमाणस्य (कर्तव्यस्य) तद् रसम् पिबति ॥

Whatever is to be given or taken, or whichever task has to be done, it should be done quickly.! If not, time will take away its essence. (The importance of that work is lost if done too late.)

आदानस्य, प्रदानस्य, कर्तव्यस्य, अक्रियमाणस्य & कर्मणः- all ष. वि. ए. व. of आदान-to take from, प्रदान-to give to, कर्तव्य- work to be done (करणीय, कार्य, कृत)- कर्मणि विध्यर्थ धा. सा. वि. of कृ-करोति-कुरुते ८ ग. उ. प. to do, make & अक्रियमाणः - not being done - न क्रियमाणः - नञ्तत्पुरुष स. क्रियमाणः- आ. प. वर्त. का. वा. धा.सा. वि. of कृ to do (please note- प. प. वर्त. का. वा. धा. सा. वि. of कृ is कुर्वत्) & कर्मन्-work, action, deed, च-and, क्षिप्रम्- अव्यय- quickly, speedily, कालः-time, period, तद् - that, रसम् -juice, taste, essence pleasure, पिबति-वर्त. तृ. पु. ए. व. of पा-१ ग. प. प to drink, absorb

षट्कर्णो भिद्यते मन्त्रश्चतुष्कर्णः स्थिरो भवेत् ।
द्विकर्णस्य तु मन्त्रस्य ब्रह्माप्यन्तं न गच्छति ॥३२२॥

षट्कर्णः मन्त्रः भिद्यते । चतुष्कर्णः (मन्त्रः) स्थिरः भवेत् । द्विकर्णस्य तु मन्त्रस्य ब्रह्मा अपि अन्तं न गच्छति।

A plan or secret heard by 6 ears (3 persons) gets revealed. Heard by 4 ears (2 persons), it stays stable. However, even the Creator will not know a secret between the two ears (of a person)!

मन्त्रः -प्र. वि. ए. व. of मन्त्र--secret, plan, षट्कर्णः & चतुष्कर्णः-प्र. वि. ए. व. of षट्कर्ण-one with six ears & चतुष्कर्ण- one with four ears, षण्णां कर्णानां समाहारः, चतुर्णां कर्णानां समाहारः - both द्विगु स.. - implying 3 & 2 persons, भिद्यते-gets broken-कर्मणि प्रयोग तृ. पु. ए. व. of भिद्- भिनक्ति-भिंत्ते ७ ग. उ. प. to break, split, cleave, tear up, स्थिरः- प्र. वि. ए. व. of

स्थिर-adjctv-steady, firm भवेत्-विध्यर्थ तृ. पु. ए. व. of भू-भवति-१ ग. प. प. to be, to exist, तु - अव्यय-however, instead, द्विकर्णस्य & मन्त्रस्य-ष. वि ए. व. of द्विकर्णः- one with two ears, single person (द्वौ कर्णौ यस्य सः - बहुव्रीही स.- implying single person) & मन्त्र-secret, plans, ब्रह्मा- प्र. वि. ए. व. of ब्रह्मन्-Creator, Brahma, अपि-अव्यव-also, and अन्तम् -end, न- no, not, गच्छति- वर्त. तृ. पु. ए. व. of गम् १ ग. प. प. to go, reach
.

उत्तमं प्रणिपातेन शूरं भेदेन योजयेत् ।
नीचमल्पप्रदानेनेष्टं धर्मेण योजयेत् ॥३२३॥ -पञ्चतन्त्र

उत्तमम् प्रणिपातेन योजयेत्, शूरम् भेदेन (योजयेत्), नीचम् अल्पप्रदानेन (योजयेत्), इष्टम् धर्मेण योजयेत्॥

The superior is to be managed by deferential respect, the brave is to be managed by betrayal, the inferior is to be managed with little presents (gifts) and loved one is to be managed by righteousness.

उत्तमम्, शूरम्, नीचम् & इष्टम्-all पु. लिं. द्वि. व. ए. व. of उत्तम-adjctv- the superior, शूर- adjctv- brave, strong, नीच- adjctv-the lower, inferior & इष्टम्- favourite, beloved-(क. भू. धा. वि. of इष्-इच्छति ६ ग. प. प. -to desire, to long) प्रणिपातेन, भेदेन, अल्पप्रदानेन & धर्मेण- all तृ. वि. ए. व. of प्रणिपात- submission, obeisance, respect भेद-dividing, separating, betrayal, अल्पप्रदान-little offering, gift, bestowing (अल्प-little, small, प्रदान-gift, offering- अल्पम् प्रदानम्-अल्पप्रदानम्- कर्मधारय स.) & धर्म- righteousness, good work, code of conduct, योजयेत् -should be managed, deployed-प्रायोजक विध्यर्थ तृ. पु. ए. व. of युज्- यनक्ति-युंक्ते ७ ग. प. प. to use, employ, prepare

उपकारगृहीतेन शत्रुणा शत्रुमुद्धरेत् |
पादलग्नं करस्थेन कण्टकेनेव कण्टकं ॥ ३२४ ॥ - महासुभाषित संग्रह

उपकार-गृहीतेन शत्रुणा, (अपरम्) शत्रुम् उद्धरेत्, पादलग्नम् कण्टकम् करस्थेन कण्टकेन इव |

We should get rid of an enemy with the help of our other enemy whom we have favoured in some way, in the same manner a thorn in foot is removed by (another) thorn in the hand.

उपकारगृहीतेन, शत्रुणा, करस्थेन & कण्टकेन - all तृ. वि. ए. व. of उपकारगृहीत- उपकार- favour, service, help, गृहीत- accepted, taken-क. भू. धा. वि. of ग्रह्-गृह्णाति-गृह्णीते ९ ग. उ. प.

to take, receive, accept- येन उपकारं गृहीतं अस्ति सः - बहुव्रीहि स. शत्रु-enemy, करस्थ-one in the hand- करे तिष्ठति इति-उपपद तत्पुरुष स & कण्टक- thorn, (अपरम्- another), शत्रुम्, कण्टकम् & पादलग्नम् -all द्वि. वि. ए. व. of शत्रु, कण्टक & पादलग्न-embedded in foot-पादम्-foot, लग्न-embedded- क. भू. धा. वि. of लग्-लगति १ ग. प. प. to adhere, stick, पादे लगति इति- पादलग्न-उपपद तत्पुरुष स., इव-अव्यय-like, similar to, उद्धरेत्- विध्यर्थ प. प. तृ. पु ए. व. of उद्+हृ to save, deliver, extricate (हृ-हरति-ते, १ ग. उ. प. to take, carry, convey)

वहेदमित्रं स्कन्धेन यावत्कालविपर्ययः।
अथैवमागते काले भिन्द्याद् घटमिवाश्मनि ॥ ३२५ ॥ -महाभा. १२.१४०.१८

यावत् कालविपर्ययः (अस्ति, तावत्) अमित्रम् स्कन्धेन वहेत्। अथ एवम् काले आगते, घटम् अश्मनि इव भिन्द्याद् ॥

Until the time is adverse, carry the enemy on shoulder, but when the proper time comes, break him like (an earthen) pot with a stone.

यावत्-अव्यय-till such time, कालविपर्ययः- adverse time -काल-time, moment, विपर्ययः- adverse, विपर्ययः कालः - वि.पू.प.कर्मधारय स, अमित्रम्-द्वि. वि. ए. व. of अमित्र-enemy- न मित्रः -नञ्तत्पुरुष स., स्कन्धेन-तृ. वि. ए. व. of स्कन्ध-shoulder, वहेत्- विध्यर्थ प. प. तृ. पु. ए. व. of वह्-वहति-ते १ ग. उ. प. to carry, bear, transport, अथ-अव्यय- then, now, but if, एवम् - अव्यय- if so, be it so, काले & आगते-स. वि. ए. व. of काल-time, moment & आगत- arrival- क. भू. धा. वि. of आ+गम्-to arrive (गम्-गच्छति १ ग. प. प. to go), घटम् -न. लि. द्वि. वि. ए. व. of घटम्-pot, अश्मनि-तृ. वि. ए. व. of अश्मन्- stone, इव-अव्यय- similar, like, भिन्द्यात्-विध्यर्थ प. प. तृ. पु. ए. व. of भिद्-भिनक्ति-भिंत्ते ७ ग. उ. प. to break, split

मा वनं छिन्धि सव्याघ्रं मा व्याघ्राः नीनशन् वनात् ।
वनं हि रक्ष्यते व्याघ्रैः व्याघ्रान् रक्षति काननम् ॥ ३२६ ॥ -महाभा.-पर्व ५,

(त्वं) सव्याघ्रम् वनम् मा छिन्धि। व्याघ्राः वनात् मा नीनशन्। व्याघ्रैः हि वनम् रक्ष्यते। काननम् व्याघ्रान् रक्षति (च) ॥

Don’t destroy the forest where tigers are living. Tigers should not get extinguished from the forests. Forest is protected by the tigers. (People don’t cut trees in the forest for fear of tigers). In turn, the forest too protects the tigers (by providing them shelter and food).

(Due to our greed, we are destroying forests and other animal species at an alarming rate! Let us follow what our ancestors told us!)

सव्याघ्रम् & वनम्- न. लि. द्वि. वि. ए. व. of सव्याघ्र-with tiger (व्याघ्रेण सहित- तृ. तत्पुरुष स.) & वन- forest, मा-अव्यय-a particle of prohibition-' do not', 'lest', छिन्धि-आज्ञार्थ द्वि. पु. ए. व. of छिद्- छिनत्ति-छिंत्ते ७ ग. उ. प. to cut, destroy, व्याघ्रा: -पु. लि. प्र. वि. ब. व. & व्याघ्रैः -पु. लि. तृ. वि. ब. व. of व्याघ्र- tiger, वनात्- न. लि. पं. वि. ए. व. of वन, नीनशन्- विध्यर्थ तृ. पु. ब. व. of नश्-नश्यति ४ ग. प. प. to be lost, vanish, to be destroyed- (desiderative--निनंक्षति, निनशिषति) हि-अव्यव-indeed, surely, रक्ष्यते-कर्मणि प्रयोग तृ. पु. ए. व. of रक्ष्-रक्षति १ ग. प. प. to protect, व्याघ्रान् -द्वि वि. ब. व. of व्याघ्र- tiger, रक्षति-वर्त. तृ. पु. ए. व. of रक्ष्, काननम्-न. लि. प्र.. वि. ए. व. of कानन-forest

गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः।
उत्पथं प्रतिपन्नस्य कार्यं भवति शासनम् ॥ ३२७ ॥ रामायण २.२१.१३ & महाभा.१.१४०

अवलिप्तस्य, कार्याकार्यमजानतः, उत्पथं प्रतिपन्नस्य गुरोः अपि कार्यम्, शासनम् भवति॥

The action, even that of a teacher, who goes astray, is arrogant and cannot discriminate between right and wrong, is (worth of) discipline.

अवलिप्तस्य, कार्याकार्यमजानतः, प्रतिपन्नस्य & गुरोः - all ष. वि. ए. व. of अवलिप्त- arrogant, haughty-क. भू. धा. वि. of अव+लिप्- (लिंप्-लिंपति-ते ६ ग. उ. प. to cover, smear), कार्याकार्यमजानन्- कार्याकार्यम्- कार्यम् च अकार्यम् च - good and bad, right and wrong. द्वंद्व स. अजानन् -न जानन्-नञ्तत्पुरुष स.-जानन्-knowing, वर्त. धा. सा. वि. of ज्ञा-जनाति-जानीते ९ ग. उ. प. to know, प्रतिपन्न-one who has resorted to-क. भू. धा. वि.of प्रति+पद्-to practice, to resort to (पद्-पद्यते ४ ग. आ. प. to go, approach & गुरु-teacher, elder, father, Head, उत्पथम्- द्वि. वि. ए. व. of उत्पथ-wrong road, astray, अपि-अव्यय-also, and, शासनम् & कार्यम् - न. लि. प्र. वि. ए. व. of शासन- punishment, instruction, discipline, teaching & कार्य-(also कर्तव्य, करणीय, कृत्य)- duty- कर्मणि विध्यर्थ धा. सा. वि. of कृ-करोति-कुरुते ८ ग. उ. प. to do, भवति-वर्त. तृ. पु. ए. व. of भू १ ग. प. प. to be

त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्॥३२८॥- -महाभा. १.११५ & चा. नीति.३.१०

कुलस्य अर्थे एकम् त्यजेत्, ग्रामस्य अर्थे कुलम् त्यजेत्, जनपदस्य अर्थे ग्रामम् (त्यजेत्), आत्मार्थे पृथिवीम् त्यजेत् ॥

(Told by Vidura to Dhritarashtra on seeing bad omens after birth of Duryodhana)
For the sake of the family, one (member) may be given up. For the sake of the village, a family may be left out. For the sake of the country a village may be given up. For the sake of self the world may be given up.

कुलस्य, ग्रामस्य, जनपदस्य -all ष. वि. ए. व. of कुल-family, race, community, ग्राम- village, hamlet, जनपद-kingdom, country, अर्थे-for the sake of.- स. वि. ए. व. of अर्थ-purpose, reason, एकम् , कुलम्, ग्रामम्, पृथिवीम् - all द्वि. वि. ए. व. of एक (पु/न. लिं.)- one, single, कुलम् (न. लि.), ग्रामम् (न. लि.), पृथिवी (स्त्री. लि.) world, earth, त्यजेत्-विध्यर्थ तृ. पु. ए. व. of त्यज्-त्यजति-१ ग. प. प. to leave, abandon, give up, surrender, आत्मार्थे- स. वि. ए. व. of आत्मार्थ-for the sake of self- आत्मनः अर्थः -ष. तत्पुरुष स.- आत्मन् -self, soul

नरपतिहितकर्ता द्वेष्यतां याति लोके
जनपदहितकर्ता त्यज्यते पार्थिवेन्द्रैः |
इति महति विरोधे विद्यमाने समाने
नृपतिजनपदानां दुर्लभः कार्यकर्ता ॥ ३२९ ॥ - सुभाषित रत्न भाण्डागारं

लोके नरपतिहितकर्ता द्वेष्यतां याति। पार्थिवेन्द्रैः जनपदहितकर्ता त्यज्यते।इति महति विरोधे विद्यमाने समाने नृपतिजनपदानां कार्यकर्ता दुर्लभः (अस्ति) ॥

In this world, the well-wisher of the Ruler, is disliked by the people. The advocate for the welfare of the people, gets abandoned by the Ruler. Thus, in these existing conflicting interests between the Ruler & the people, it is rare to find a worker who works for the (interests of) both.

लोके-स. वि. ए. व. of लोक-world, नरपतिहितकर्ता & जनपदहितकर्ता- प्र. वि. ए. व. of नरपतिहितकतृ -नरपति-king ruler- नराणाम् पतिः- ष. तत्पुरुष स.- हित- well-being -क. भू. धा. वि. of हि-हिनोति ५ ग. प. प. to promote, incite, urge- हितम् करोति इति हितकतृ - उपपद तत्पुरुष स. & नरपतेः हितकतृ -नरपतिहितकतृ-ष. तत्पुरुष स. & जनपदहितकतृ-जनपद-community, kingdom, जनपदस्य हितकतृ-ष. तत्पुरुष स., द्वेष्यताम्-द्वि. वि. ए. व. of द्वेष्यता-hatred, dislike, याति- वर्त. तृ. पु. ए. व. of या- २ ग. प. प. to come to, to go, पार्थिवेन्द्रैः- तृ. वि. ब. व. of पार्थिवेन्द्र-King, lord of the world, पार्थिव- earthen, an inhabitant of earthl, इन्द्रः -lord- पार्थिवानाम् इन्द्रः- ष. तत्पुरुष स. त्यज्यते- gets abandoned-कर्मणि प्रयोग तृ. पु. ए. व. of

त्यज्-त्यजति १ ग. प. प. to leave, abandon, इति-अव्यय- so, thus, महति, विरोधे, विद्यमाने & समाने- all स. वि. ए. व. of महत्-big, huge, विरोध- conflict, difference, विद्यमान- existing-वर्त. धा. सा. वि. of विद्-विद्यते ४ ग. आ. प. to exist & समान-common, equal, नृपतिजनपदानाम्- ष. वि. ब. व. of नृपतिजनपद- नृपतिः च जनपदः च -द्वंद्व स., नृपतिः-King- नृ-man, नृणाम् (नृ-दीर्घ) पतिः- ष. तत्पुरुष स , कार्यकर्ता-worker-कार्य-(करणीय, कर्तव्य, कृत्य) work, task- कर्मणि विध्यर्थ धा. सा. वि. of कृ-करोति-कुरुते ८ ग. उ. प. to do- कार्यम् करोति इति-कार्यकर्ता-उपपद तत्पुरुष स., दुर्लभः-rare, difficult to get

न विश्वसेदविश्वस्ते विश्वस्तेऽपि न विश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥ ३३० ॥-पंचतंत्र

पाठभेद:
न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद्भयमुत्पन्नमपिमूलं निकृन्तति ॥ ३३० ॥ महाभा. १.१५३

अविश्वस्ते न विश्वसेत् । विश्वस्ते अपि न (न अति) विश्वसेत् । विश्वासात् भयम् उत्पन्नम् (भवति)। (तद्) मूलानि अपि (मूलम् अपि) निकृन्तति।

One should not trust an untrustworthy. Trustworthy also should not be blindly trusted. The trust gives rise to fear and destroys one completely.

अविश्वस्ते & विश्वस्ते- स. वि. ए. व. of अविश्वस्त untrustworthy-न विश्वस्त- नञ्तत्पुरुष स. & विश्वस्त- trustworthy- क. भू. धा. वि. of वि+श्वस्- to trust, confide in-(श्वस्-श्वसिति २ ग. प. प. to breathe, respire), न-no, not, विश्वसेत्- विध्यर्थ तृ. पु. ए. व. of -श्वस्-श्वसिति २ ग. प. प., अपि-also, and & अति-too much, excessively- both अव्यय; विश्वासात् -पं. वि. ए. व. of विश्वास-trust, confidence, भयम्- fear, उत्पन्नम् - produced, born generated- क. भू. धा. वि. of उद्+पद्-(पद्-पद्यते ४ ग. आ. प. to go, move, approach) मूलानि-द्वि. वि. ब. व. & मूलम्-द्वि. वि. ए. व. of मूल (न. लिं)- root, base, निकृन्तति-वर्त. तृ. पु. ए. व. of -नि+कृत्-cut, asunder, destroy (कृत्-कृन्तति ६ ग. प. प.)

न संशयमनारुह्य नरो भद्राणि पश्यति ।
संशयं पुनरारुह्य यदि जीवति पश्यति ॥ ३३१ ॥ महाभा. १.१५४

नरः संशयम् अनारुह्य न भद्राणि पश्यति। संशयम् पुनः आरुह्य यदि जीवति, (सः भद्राणि) पश्यति॥

No man can achieve prosperity without taking (some) risks. If he overcomes, (survives) those risks, (he) will experience (see) happiness.

नरः- a man, person, संशयम्- danger, risk (also means doubt, uncertainty, hesitation), आरुह्य-पू. का. वा. ल्यबन्त धा. सा. अव्यय of आ+रुह्-to get upon, ride, to run a risk (रुह्-रोहति १ ग. प. प. to grow, spring up, shoot forth), न आरुह्य-अनारुह्य- नञ्तत्पुरुष तत्पुरुष स. भद्राणि- न. लिं. द्वि. वि. ब. व. of भद्रम्- prosperity, happiness, पश्यति-sees & जीवति-lives-both १ ग. प. प. वर्त. तृ. पु. ए. व. of दृश् -to see, look at, perceive, behold & जीव् - survive, live, यदि- if, in case & पुनः (पुनर्) again, anew, next time-both अव्यय

नात्यन्तं सरलैर्भाव्यं गत्वा पश्य वनस्थलीम् ।
छिद्यन्ते सरलास्तत्र कुब्जास्तिष्ठन्ति पादपाः ॥ ३३२ ॥ - चाणक्य नीति

(मनुजैः) न अत्यन्तम् सरलैः भाव्यम् । (त्वम्) गत्वा वनस्थलीम् पश्य। तत्र सरलाः पादपाः छिद्यन्ते। कुब्जाः (पादपाः) तिष्ठन्ति ॥

One should not be excessively straight (forward). Go to forest and see. There (in the forest), the straight trees are chopped down while curved (trees) ones survive!

न- no, not, अत्यन्तम्- adjctv-very much, extremely, excessively, perfect, सरलैः-तृ. वि. ब. व. of सरल-straight, भाव्यम्-worth to be, performed- भाव्य-भवनीय-भवितव्य-भव्य- कर्मणि विध्यर्थ धा. सा. वि. of भू-भवति १ ग प. प to be, गत्वा-after going- पू. का. वा. त्वांत धा. सा. अव्यय of गम्-गच्छति १ ग. प. प. to go, वनस्थलीम् -द्वि. वि. ए. व. of वनस्थली-forest, woods पश्य-आज्ञार्थ द्वि. पु. ए. व. of दृश्-पश्यति १ ग. प. प. to see, observe, तत्र-अव्यय-there, in that place, सरलाः, पादपाः & कुब्जाः- प्र. वि. ब. व. of सरल-straight, पादप-tree- पदैः पिबति इति - उपपद तत्पुरुष स. & कुब्ज- dwarf, curved, crooked छिद्यन्ते- get cut-कर्मणि प्रयोग तृ. पु. ब. व. of छिद् ७ ग. उ. प. छिनत्ति-छिंत्ते to cut, rend, तिष्ठन्ति-वर्त. तृ. पु. ब. व. of स्था-तिष्ठति १ ग. प. प. to stand, survive,

पञ्चभिः सह गन्तव्यं स्थातव्यं पञ्चभिः सह ।
पञ्चभिः सह वक्तव्यं न दुःखं पञ्चभिः सह॥३३३॥ - सुभाषित रत्न भाण्डागारं

(मनुजैः) पञ्चभिः सह गन्तव्यम्, पञ्चभिः सह स्थातव्यम्, पञ्चभिः सह वक्तव्यम् । पञ्चभिः सह न दुःखम् (आप्नोति) ॥

One should travel with five (others). One should stay with five (others). One should talk with five (others). When (you are) with five (others), there is no trouble/ danger.

This Subhaashit advises that one should work with (five) others in any activity for its success and to avoid any problems. I do not think the number five has any specific significance although many claim so. (Five big elements, five sensory oprgans, five action organs etc)

पञ्चभिः -तृ. वि. ब. व of पञ्चन्- five, सह-अव्यव- with, together, गन्तव्यम्, स्थातव्यम्, वक्तव्यम् all- न. लिं. प्र. वि. ए. व. of – गन्तव्य (गमनीय, गम्य), स्थातव्य (स्थानीय, स्थेय), वक्तव्य (वचनीय, वाच्य, वाक्य)-all कर्मणि विध्यर्थ धा. सा. विशेषण of गम्-गच्छति १ ग. प. प . To go, move, depart, स्था-तिष्ठति-१ ग. प. प. to stay, stand & वच्-वक्ति २ ग. प. प. to say, speak, दुःखम् -न. लिं. द्वि. वि. ए. व. of दुःख- sorrow, trouble, न- no, not

दण्डश्चेन्न भवेल्लोके विनश्येयुरिमाः प्रजाः।
जले मत्स्यानिवाभक्षन् दुर्बलान् बलवत्तराः॥३३४॥ महाभा. शांति.अ.६७

(इह) लोके, दण्डः चेत् न भवेत्, (तदा) इमाः प्रजाः विनश्येयुः, जले बलवत्तराः दुर्बलान् मत्स्यान् अभक्षन् इव ॥

If there is no punishment in this world, these people will perish like, the stronger fish swallowing the weaker ones in water.

पाठ भेद. : (Alternate)
राजा चेन्न भवेल्लोके पृथिव्यां दण्डधारकः।
जले मत्स्यानिवाभक्षन् दुर्बलं बलवत्तराः॥३३४॥

पृथिव्याम् दण्डधारकः राजा चेत् न भवेत्, लोके दुर्बलम् बलवत्तराः जले मत्स्यान् इव अभक्षन्॥

If there is no King in this world, who can punish (the guilty), the weak will be swallowed by the stronger ones, like fish in the water.

दण्डः, दण्डधारकः & राजा all-प्र. वि. ए. व. of दण्ड-punishment, stick, rod, दण्डधारकः-punishment giver- दण्डम् धारयते इति -उपपद तत्पुरुष स. & राजन्-king, चेत्- अव्यय-if, in case, न- no, not, भवेत्-विध्यर्थ. तृ. पु. ए. व. of भू-भवति १ ग. प. प. to be, exist, लोके, जले, पृथिव्याम्-स. वि. ए. व. of लोक (पु/न. लिं.)- -world, people, जल-(पु/न. लिं.)-water, पृथिवी-(स्त्री. लिं.)-world, earth, इमाः, प्रजाः, बलवत्तराः -all प्र. वि. ब. व. of इदम् (स्त्री. लिं.)- this, she,

प्रजा (स्त्री. लिं.)-humankind, subjects, बलवत्तर (पु. लिं.)- Superlative of बलवत् -strong, mighty, दुर्बलान् & मत्स्यान् -पु. लिं. द्वि. वि. ब. व. दुर्बल-weak (बलम्-strength- दुर्-अव्यय-a prefix before word in the sense 'bad, hard, difficult, poor) & मत्स्य- fish, दुर्बलम्- पु. लिं. द्वि. वि. ए. व. of दुर्बल, अभक्षन्-अनद्यतन भूत. तृ. पु. ब. व. of भक्ष्-भक्षति १ ग. प. प. to eat, devour (normally- भक्ष्-भक्षयति-ते is १० ग. उ. प.), इव- अव्यय-like, in this way, विनश्येयुः- विध्यर्थ तृ. पु. ब. व. of वि+नश्- to perish, get destroyed (नश्-नश्यति ४ ग. प. प.)

राज्ञि धर्मिणी धर्मिष्ठाः पापे पापाः समे समाः।
राजानमनुवर्तन्ते यथा राजा तथा प्रजाः ॥ ३३५॥ - चाणक्य नीति

धर्मिणी राज्ञि, (प्रजाः) धर्मिष्ठाः (भवन्ति) । पापे (राज्ञि), (प्रजाः) पापाः (भवन्ति) । समे (राज्ञि), (प्रजाः) समाः (भवन्ति) । (प्रजाः) राजानम् अनुवर्तन्ते। यथा राजा (भवति), तथा प्रजाः (भवन्ति) ॥

If the King is a follows right code of conduct (धर्म), the subjects will follow right code of conduct (धर्म). If the King is a sinner, the subjects will also be sinners,. If the King is upright/just, the subjects will also be upright/just. The subjects follow the King. As the King is, so are the subjects.

धर्मिणी, राज्ञि, पापे, समे all-पु. लिं. स. वि. ए. व. of धर्मिन्-virtuous, pious, राजन्-king, पापिन्- sinful, wicked, सम-upright/just, प्रजाः, धर्मिष्ठाः पापाः, समाः -all-स्त्री. लिं. प्र. वि. ब. व. of प्रजा- subjects, citizen, धर्मिष्ठा- virtuous, pious, पापा-sinful, wicked, समा-upright/just, राजानम् - द्वि. वि. ए. व. & राजा-प्र. वि. ए. व. of राजन्-king (पु. लिं.), अनुवर्तन्ते-वर्त. तृ. ब. व. of अनु+वृत् to follow, act according to (वृत् +वर्तते १ ग. आ. प. to be, exist), यथा-as, in the manner mentioned, तथा-thus, in that manner-both अव्यय

व्रजन्ति ते मूढधियः पराभवं
भवन्ति मायाविषु येन मायिनः |
प्रविश्य हि घ्नंति शठास्तथाविधान्
असंवृताङ्गान् निशिता इवेषवः॥ ३३६ ॥ - भारवि-किरातार्जुनीय

ये मायाविषु मायिनः न भवन्ति, ते मूढधियः पराभवम् व्रजन्ति। शठाः, तथाविधान्, असंवृताङ्गान् निशिताः इषवः इव, प्रविश्य हि घ्नंति ॥

The dumb people suffer defeat from the cheaters, if they do not approach them in their own way. Like Sharp arrows entering the unprotected body, these cheaters get amongst (straight forward, simple) people and destroy them.

ये-who, ते-they & मूढधियः -stupid, foolish - all प्र. वि. ब. व. of यद्- who, तद् -he, that & मूढधी-stupid, foolish, मायाविषु -स. वि. ब. व. of मायाविन् & मायिनः ष. वि. ए. व. of मायिन् both meaning, 'rogue, cheat, conjurer, skilled in magic', न-no, not, भवन्ति & व्रजन्ति वर्त. तृ. पु. ब. व. of भू-भवति १ ग. प. प. to be, exist & व्रज्-व्रजति १ ग. प. प. to go, approach, पराभवम् -द्वि. वि. ए. व. of पराभव - defeat, failure, शठाः, निशिताः, इषवः - all प्र. वि. ब. व. of शठ-wicked, cheat, swindler, निशित- sharpened, thin- क. भू. धा. वि. of नि+शि-(शि-शिनोति-शिनुते ५ ग. उ. प. to sharpen, make thin, इषु -arrow, तथाविधान्- of that type, असंवृताङ्गान् -द्वि. वि. ब. व. of-असंवृताङ्ग- unprotected body-असंवृत -न संवृत -नञ्तत्पुरुष स. -संवृत-covered-क. भू. धा. वि. of सं+वृ -to cover, shut, hide (वृ-१,५ &९ ग. उ. प. वरति-ते, वृणोति-वृणुते, वृणाति-वृणीते- to choose, select), असंवृतः अङ्गः-असंवृताङ्गः- उपपद तत्पुरुष स. इव-अव्यव-like, similar to, प्रविश्य-after entering- पू. का. वा. धा. सा. ल्यबन्त अव्यव, हि-अव्यव-indeed, surely, घ्नंति-तृ. पु. ब. व. of हन्-हन्ति २ ग. प. प. to kill

विधाय वैरं सामर्षे नरोऽरौ ये उदासते ।
प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतम् ॥ ३३७ ॥ -शिशुपालवध २. ४२. २

ये नरः सामर्षे अरौ वैरम् विधाय उदासते, ते अभिमारुतम् उदर्चिषम् कक्षे प्रक्षिप्य शेरते॥

Those men, hostile towards an angry enemy (still) do not act; keep a wind exposed burning fire, under their arms and sleep.

नरः -(ना नरौ नरः)-प्र. वि. ब. व. of नृ -man, person, ये –those who & ते-they- प्र. वि. ब. व. of तद्- he & यद्-who, सामर्षे & अरौ-स. वि. ए. व. of सामर्ष- अमर्ष-anger, jealousy - अमर्षेण सहितम् -सामर्षम् -तृ. तत्पुरुष स. & अरि (पु. लिं.)-enemy, वैरम्-द्वि. वि. ए. व. of वैर-enmity, विधाय- पू. का. वा. ल्यबन्त धा. सा. अव्यय of वि+धा-to do, bring about, cause (धा-दधाति धत्ते ३ ग. उ. प. to set, fix, place), उदासते & शेरते -वर्त. तृ. पु. ब. व. of उद्+आस्- to be indifferent, not acting (आस्-आस्ते २ ग. आ. प. to sit, lie, rest) & शी-शेते २ ग. आ. प. to sleep, like, rest, अर्चिस्-(न. लिं)-flame, ray of light, उदर्चिषम् -द्वि. वि. ए. व. of उदर्चिस्-live fire (यद् अर्चिः उद्गतम् अस्ति तद् -उदर्चिस्- बहुव्रीही स.), कक्षे- स. वि. ए. व. of कक्ष- arm pit, the side प्रक्षिप्य- पू. का. वा. ल्यबन्त धा. सा. अव्यय of प्र+क्षिप्- to put, insert (क्षिप्- क्षिपति-ते-६ ग. उ. प. to throw, cast, dispatch), अभिमारुतम् -मारुतम् अभि- अभिमारुतम् -towards/exposed to wind

लक्ष्मीः चन्द्रादपेयाद्वा हिमवान् वा हिमं त्यजेत्।
अतीयात् सागरो वेलां न प्रतिज्ञामहं पितुः ॥ ३३८ ॥ --रामा. अयोध्या. का.

चन्द्रात् लक्ष्मीः अपेयात्, हिमवान् हिमम् त्यजेत् वा सागरः वेलाम् अतीयात्, अहम् पितुः प्रतिज्ञाम् न (त्यजामि) ॥

Let the beauty/splendour be taken away from the Moon, let the Himalaya abandon his Snow or let the Ocean cross it's shore, I will not dishonour the vow made to my father.(-(These are the words of Rama, before leaving for the Vanavaas)

चन्द्रात्-पं. वि. ए. व. of चन्द्र- the Moon, लक्ष्मीः - द्वि. वि. ब. व. of लक्ष्मी-Beauty, Charm, Spendor, अपेयात्, त्यजेत् & अतीयात्- all विध्यर्थ तृ. पु. ए. व. of अप+इ- to take away, deprive of, (इ-एति २ ग. प. प. to come, go to), त्यजेत् - to leave, abandon -(त्यज्-त्यजति १ ग. प. प.) & अति+इ-cross, go over, हिमवान्-प्र. वि. ए. व. of हिमवत्- epithet of Himalaya, हिमम्- द्वि. वि. ब. व. of हिम-snow, वा-अव्यय-or, and, सागरः- प्र. वि. ए. व. of सागर- ocean, वेलाम्- द्वि. वि. ब. व. of वेला (स्त्री. लिं.)-shore, bank, अहम् -प्र. वि. ए. व. of अस्यद्-I, we, पितुः -ष. वि. ए. व. of पितृ- father, प्रतिज्ञाम्- द्वि. वि. ब. व. of प्रतिज्ञा (स्त्री. लिं.)-vow, promise, न-no, not

सूतो वा सूतपुत्रो वा यो वा को वा भवाम्यहम्।
दैवायत्तं कुले जन्म मयायत्तं तु पौरुषम् ॥३३९॥ - कर्ण-वेणीसंहार नाटक

अहम् सूतः वा सूतपुत्रः वा यः वा कः वा भवामि। कुले जन्म दैवायत्तम् (भवति)। पौरुषम् तु मया आयत्तम् (अस्ति) ॥

Let me be charioteer or the son of a charioteer (implying born in low cast) ! Birth in a (good) family is dependent on the grace of God but heroism/prowess is aquired by me.

अहम् , सूतः, सूतपुत्रः, यः & कः all पु. लिं. प्र. वि. ए. व. of अस्मद् -I, we, सूत- charioteer, bard, सूतपुत्र-son of a charioteer /bard (सूतस्य पुत्रः -ष. तत्पुरुष स.), यद् -who, किम्-who, why, वा-अव्यय-or, and, भवामि- वर्त. प्र. पु. ए. व. of भू-भवति १ ग. प. प. to be, exist, कुले-स. वि. ए. व. of कुलः /कुलम्-पु./न. लिं.-family, race, जन्म & पौरुषम् -न. लिं. प्र. वि. ए. व. of जन्मन् - birth & पौरुषम् -heroism/prowess, दैवायत्तम्-dependent on divine grace- दैवेण आयत्तम् - तृ. तत्पुरुष स., आयत्तम्-न. लिं. प्र. वि. ए. व. of आयत्त-dependent on, acquired (क. भू. धा. वि. of आ+यत् (यत्-यतते-१ ग. आ. प. to strive, endeavour, तु -अव्यय-on the contrary, instead, मया-तृ. वि. ए. व. of अस्मद्-I, we,

अलातं तिन्दुकस्येव मुहूर्तमपि हि ज्वल।
मा तुषाग्निरिवानर्चिर्धूमायस्व जिजीविषुः ॥ ३४०॥ महाभारतम्-05-उद्योगपर्व-133

(त्वम्) तिन्दुकस्य अलातम् इव मुहूर्तम् अपि हि ज्वल। तुषाग्निः इव अनर्चिः जिजीविषुः मा धूमायस्व।

Like a burning tree, blaze just only for a moment. Do not smoke like a burning husk, just for the sake of living.

तिन्दुकस्य- ष. वि. ए. व. of तिन्दुक-tree, अलातम्- half burnt wood, मुहूर्तम् -a moment, इव- like, similar to, अपि - just, only, also, हि- instead, only- all अव्ययs, ज्वल- आज्ञार्थ द्वि. पु. ए. व. of ज्वल्-ज्वलति १ ग. प. प. to burn brightly, blaze, glow, मा-अव्यय- particle of prohibition in the sense of 'lest', 'that not', अर्चिस् (अर्चिः)- flame, fire, अनर्चिः-without fire or flame - न अर्चिः -नञ्तत्पुरुष स., तुषः-husk, chaff of grain-तुषाणाम् अग्निः - तुषाग्निः- husk fire, धूमायस्व-द्वि. पु. ए. व. of नामसाधित धातु- धूम्-smoke-धूमायति-ते १० ग. उ. प. to give out smoke, जिजीविषुः- wanting to survive/ live

अकृत्वा परसन्तापमगत्वा खलमन्दिरम् ।
अक्लेशयित्वा चात्मानं यदल्पमपि तद्बहुम् ॥३४१॥
पाठभेद : अनुत्सृज्य सतां वर्त्म यद्स्वल्पमपितद्बहुम्

परसन्तापम् अकृत्वा, खलमन्दिरम् अगत्वा, आत्मानम् अक्लेशयित्वा, यद् अल्पम् अपि (कृतम्) तद् बहुम् (भवति) ॥

पाठभेद : सतां वर्त्मम् अनुत्सृज्य, यद् स्वल्पम् अपि (कृतम्) तद् बहुम् (भवति)॥

Without causing distress to others, without visiting a wicked person's house, without causing suffering to oneself (without abandoning the path of the nobles), whatever little is achieved, is indeed plenty!

परसन्तापम्, खलमन्दिरम्, आत्मानम्, अल्पम्, स्वल्पम्, बहुम्, वर्त्मम् -all द्वि. वि. ए. व. of परसन्ताप - परस्य संताप - ष. तत्पुरुष स. - hurting or distressing others, खलमन्दिर -wicked person's house-खलस्य मन्दिरम्-ष. तत्पुरुष स., आत्मन्-self, अल्प & स्वल्प-adjctv- small, little, बहु-adjctv-more, plenty, वर्त्मन्-(न. लिं.) path, way, अकृत्वा, अगत्वा, अक्लेशयित्वा - all नञ्तत्पुरुष स.- न कृत्वा- not doing, न गत्वा-not going, न क्लेशयित्वा-not causing suffering- all पू. का. वा. त्वान्त धा. सा. अव्यय of कृ-करोति-कुरुते ८ ग. उ. प.-to do, गम्-

गच्छति १ ग. प. प. to go, क्लिश्-क्लेशयति-ते-(प्रयोजक)-to cause suffering (क्लिश् -क्लिश्यते ४ ग. आ. प. to suffer), यद्-which, what, अपि-also, and, तद्- that, it, सताम्- of nobles- ष. वि. ब. व. of सत्- noble, honest, अनुत्सृज्य-- न उत्सृज्य नञ्तत्पुरुष स. उत्सृज्य- पू. का. वा. ल्यबन्त धा. सा. अव्यय of उद्+सृज्-to leave, abandon (सृज्-सृजति-६ ग. प. प . to create, produce

अग्निहोत्रं गृहं क्षेत्रं गर्भिणीं वृद्धबालकौ।
रिक्तहस्तेन नोपेयात् राजानं देवतां गुरुम्॥३४२॥

पाठभेद (second version)
अग्निहोत्रं गृहं क्षेत्रं मित्रं भार्यां सुतं शिशुम्।
रिक्तपाणिर्न पश्येत राजानं देवतां गुरुम्॥३४२॥

अग्निहोत्रम्, गृहम्, क्षेत्रम्, गर्भिणीम्, वृद्धबालकौ, (मित्रम् भार्याम्, सुतम्, शिशुम्) राजानम्, देवताम्, गुरुम्, रिक्तहस्तेन (रिक्तपाणिः) न उपेयात् (पश्येत) ॥

One should not approach empty-handed, (should not see) the holy fire, a house, a holy place, a pregnant woman, an old man, a child, (a friend, a wife, a son), a king, a deity and a teacher.

अग्निहोत्रम् -the holy fire, गृहम्- house, क्षेत्रम्-holy place, गर्भिणीम् -pregnant woman, वृद्ध-old man(क. भू. धा. वि. of वृ-वर्धते १ ग. आ. प. to grow, increase, बालक-child-, वृद्धम् च बालकम् च- वृद्धबालकौ-द्वंद्व स. (मित्रम्-friend, भार्याम् -wife, सुतम्-son, शिशुम्) राजानम्-king, देवताम् -deity, गुरुम्-teacher-all in द्वि. वि. ए. व., रिक्तहस्तेन-तृ. वि. ए. व. of रिक्तहस्त-रिक्तः हस्तः यस्य सः -बहुव्रीही स., रिक्तपाणिः- प्र. वि. ए. व. of रिक्तपाणि -रिक्तः पाणिः यस्य सः -बहुव्रीही स., उपेयात्-विध्यर्थ प. प. तृ. पु. ए. व. of उप+इ -to approach-इ- एति २ ग. प. प. पश्येत- विध्यर्थ आ. प. तृ. पु. ए. व. of दृश्-पश्यति १ ग. प. प. to see, meet
.

अनागतविधाता च प्रत्युत्पन्नमतिश्च यः ।
द्वावेव सुखमेधेते दीर्घसूत्री विनश्यति ॥३४३॥ -महाभा. शांति. अ १३७ By Bhishma

यः अनागत-विधाता च (अस्ति), (यः) प्रत्युत्पन्नमतिः च (अस्ति), द्वौ एव सुखम् एधेते। (यः) दीर्घसूत्री (भवति) (सः) विनश्यति।

These two, one who plans for future (like old age) and the one with presence of mind (ability to act promptly), will happily prosper. A procrastrinating person will perish.

यः -who, अनागतविधाता- planer of unforeseen & प्रत्युत्पन्नमतिः- one has presence of mind- all in पु. लिं. प्र. वि. ए. व. of यद्-who, अनागतविधातृ -अनागत-future-न आगत-नञ्तत्पुरुष स.- आगत-present, arrived-क. भू. धा. वि. of आ+गम् -(गम्-गच्छति १ ग. प. प.), विधातृ-creator, maker-अनागतानाम् विधातृ-ष. तत्पुरुष स. & प्रत्युत्पन्नमति -प्रत्युत्पन्न- prompt, ready, मतिः- mind-(प्रत्युत्पन्ना मतिः यस्य सः -बहुव्रीही स.), च -and, also, द्वौ-प्र. वि. द्वि. व. of द्वा- two, एव- अव्यय-only, just so, सुखम्- happiness, एधेते-तृ. पु. द्वि. व. of एध्-एधते १ ग. आ. प. to prosper, grow, दीर्घसूत्री-Dilatory (slow to act, procastrinating) person - in पु. लिं. प्र. वि. ए. व., विनश्यति-तृ. पु. ए. व. of वि+ नश्-to get destroyed (नश्-नश्यति ४ ग. प. प. to perish)

न स्थातव्यं न गन्तव्यं क्षणमप्यधमैः सह ।
पयोऽपि शौण्डिकीहस्ते वारुणीत्यभिधीयते ॥ ३४४ ॥

अधमैः सह क्षणम् अपि न स्थातव्यम् न गन्तव्यम् (भवेत्)। शौण्डिकी-हस्ते पयः अपि वारुणी इति अभिधीयते ॥

One should not stay with or accompany a bad person, even for a moment! Even milk is called wine, in the hands of a woman who sells liquor.

अधमैः -तृ. वि. ब. व. of अधम--wicked, bad person, सह-अव्यय- together, in company, क्षणम् -moment, अपि-अव्यय-even, also, and, न -no, not, स्थातव्यम् - must stay & गन्तव्यम् - must go-स्थातव्य (स्थानीय, स्थेय) & गन्तव्य (गमनीय, गम्य)-both कर्मणि विध्यर्थ धा. सा. विशेषण of स्था-तिष्ठति १ ग. प. प. to stay, stand & गम्-गच्छति १ ग. प. प. to go, शौण्डिकीहस्ते-स. वि. ए. व. of शौण्डिकीहस्त- शौण्डिकी- a woman selling liquor, हस्त- hand- शौण्डिक्याः हस्तः- ष. तत्पुरुष स., पयः (पयस्)- water, milk, वारुणी-liquor, wine, इति - अव्यय- this particle is used to report the very word spoken-thus, so अभिधीयते-gets called, gets named -कर्मणि प्रयोग तृ. पु. ए. व. of अभि+धा today, tell, denote, express, convey (धा-दधाति-धत्ते ३ ग. उ. प. to put, set, place, fix)

अरावप्युचितं कार्यमातिथ्यं गृहमागते ।
छेत्तुः पार्श्वगताच्छायां नोपसंहरते द्रुमः ॥ ३४५ ॥ -हितोपदेश १.५९

गृहमागते अरौ अपि उचितम् आतिथ्यम् कार्यम् (भवति)। द्रुमः पार्श्वगतात् छेत्तुः छायाम् न उपसंहरते ॥

Proper hospitality is to be provided, even to an enemy, visiting the house. A tree does not take away the shade from a (wood) cutter, who has come near it.

गृहमागते & अरौ both -स. वि. ए. व. of गृहमागत-one who has come home-गृहे आगतः इति-सप्तमि तत्पुरुष स.-आगत-क. भू. धा. वि. of आ+गम्-to come to- (गम्-गच्छति १ ग. प. प. to go) & अरि-enemy, अपि-अव्यव-also, even, and, उचितम् -fit, proper-क. भू. धा. वि. of उच्-उच्यति -४ ग. प. प. to be proper, used to, to collect, आतिथ्यम् -hospitality, कार्यम् - to be done-कार्य, (करणीय, कर्तव्य & कृत्य)-कर्मणि विध्यर्थ धा. सा. विशेषण of कृ-करोति-कुरुते ८. ग. उ. प. to do), द्रुमः -पु. लिं. प्र. वि. ए. व. of द्रुम -tree, पार्श्वगतात् & छेत्तुः -पं. वि. ए. व. of पार्श्वगत-पार्श्वे गतः- स. तत्पुरुष स.-पार्श्व-side of, near to, towards & गत- gone क. भू. धा. वि. of गम्-गच्छति १ ग. प. प. to go & छेत्तृ-cutter, छायाम् -द्वि. वि. ए. व. of छाया-shade, shadow, न -no, not, उपसंहरते-तृ. पु. ए. व. of उप+सं+हृ- to take away (हृ-हरति-ते १ ग. उ. प. to carry, take, convey)

चलत्येकेन पादेन तिष्ठत्येकेन पण्डितः।
नासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत्॥३४६॥ -सुभाषित रत्न भाण्डागारं

पण्डितः एकेन पादेन चलति, एकेन (पादेन) तिष्ठति। (बुद्धिमान्), असमीक्ष्य परम् स्थानम्, पूर्वम् आयतनम् न त्यजेत्॥

Wise person walks with one foot and stands on one foot. (Takes one-step at a time while walking). Without proper knowledge of the other place, one should not leave the earlier place (job, state, abode etc).

पण्डितः- प्र. वि. ए. व. of पण्डित- wise person, एकेन & पादेन-तृ. वि. ए. व. of एकः/एकम् - one, single & पादः/पादम्- foot- both-पु/न. लिं., चलति-walks- चल् -to walk & तिष्ठति-stands-स्था-to stand, stay-both-१ ग. प. प. वर्त. तृ. पु. ए. व., असमीक्ष्य- न समीक्ष्य-नञ्तत्पुरुष स-समीक्ष्य-proper seeing, observation- पू. का. वा. धा. सा. ल्यबन्त अव्यव of सम्+ईक्ष् ईक्ष् -ईक्षते १ आ.प to see, consider, examine carefully, परम्- other, स्थानम्- place, पूर्वम् - earlier, original & आयतनम् - abode, place- all in न. लिं. द्वि. वि. ए. व., न-no, not, त्यजेत्-विध्यर्थ तृ. पु. ए. व. of त्यज्-त्यजति १ ग. प. प. to abandon, leave बुद्धिमत् - Intelligent, Wise

दिनान्ते च पिबेद् दुग्धं, निशान्ते च जलं पिबेत् |
भोजनान्ते पिबेत् तक्रं, किं वैद्यस्य प्रयोजनम् ॥ ३४७॥

दुग्धम् दिनान्ते पिबेत्। जलम् निशान्ते पिबेत्। तक्रम् च भोजनान्ते पिबेत्। (तदा) वैद्यस्य किम् प्रयोजनम् ?

(One should) drink milk at the end of the day, drink water at the end of the night and drink buttermilk at the end of a meal. (If you do that, then) Why would you need a Doctor?

दुग्धम्, जलम्, तक्रम्- all द्वि. वि. ए. व. of दुग्ध-milk, जल-water, तक्र -buttermilk, दिनान्ते, निशान्ते, भोजनान्ते - all स. वि. ए. व. of दिनान्त-end of the day-दिनस्य अन्तम् -दिनम्-day (न. लिं.), निशान्त-end of the night- निशायाः अन्तम्-निशा-(स्त्री. लिं.)- night, भोजनान्त-end of a meal-भोजनस्य अन्तम्-भोजनम् -meal (न. लिं.)-all -ष. तत्पुरुष स, च-and, पिबेत्-विध्यर्थ तृ. पु. ए. व. of पा-पिबति-१ ग. प. प. to drink, वैद्यस्य -ष. वि. ए. व. of वैद्य-physician, doctor, किम् -what, which, प्रयोजनम्-use, utility, need

दृष्टिपूतं न्यसेत्पादं, वस्त्रपूतं जलं पिबेत् ।
सत्यपूतां वदेद्वाचं, मनःपूतं समाचरेत् ॥ ३४८ ॥ -भागवत ११.१८.१६

पादम् दृष्टिपूतम् न्यसेत्। जलम् वस्त्रपूतम् पिबेत्। वाचम् सत्यपूताम् वदेत् । मनःपूतम् समाचरेत् ॥

One should put his foot forward after looking (carefully), drink (clean) water filtered by cloth, speak (only) truthful words and act after (thorough) consideration by mind.

पादम्, जलम्, वाचम्, दृष्टिपूतम्, वस्त्रपूतम्, सत्यपूताम् & मनःपूतम् -all द्वि. वि. ए. व. of पाद-(न. लिं.) foot, step, जल-(न. लिं.)-water, वाच् -(स्त्री. लिं.)-word, talk, दृष्टिपूत- दृष्ट्या पूतम्- (दृष्टिः-sight, faculty of seeing, पूत-purified, cleaned, washed -क. भू. धा. वि. of पू-१ ग.पवते- & ४ ग.-पूयते आ. प.& ९ ग. उ. प. पुनाति-पुनीते-to cleanse, make pure, purify, वस्त्रपूत- वस्त्रेण पूतम् -वस्त्र-(न. लिं.) cloth, सत्यपूत-सत्येण पूतम्-सत्यम्-(न. लिं.)-truth, मनःपूत-मनसा पूतम् -मनस्-(न. लिं.) mind, heart- all तृ. तत्पुरुष स., न्यसेत्, पिबेत्, वदेत् & समाचरेत्-all विध्यर्थ तृ. पु. ए. व. of नि+अस्- to set, place (अस्-अस्ति २ ग. प. प. to be), पा-पिबति १ ग. प. प. to drink, वद्-वदति-१ ग. प. प. -to speak & सं+आ+चर्- to perform, act (चर्-चरति-१ ग. प. प. to walk)

सर्वे यत्र विनेतारः सर्वे यत्राभिमानिनः।
सर्वे महत्त्वमिच्छन्ति कुलं तदवसीदति ॥३४९॥ -

यत्र (कुले) सर्वे विनेतारः (सन्ति), यत्र (कुले) सर्वे अभिमानिनः (भवन्ति), (यत्र कुले) सर्वे महत्त्वम् इच्छन्ति, तत् कुलं अवसीदति॥

(In a family/race/ house) where everyone is a leader, where everyone is proud of himself, where everyone wants to be most important, that family/race /house will come to an end.

यत्र-अव्यव-where, in which place, सर्वे-पु. लिं. प्र. वि. ब. व. of सर्व- all, everyone, विनेतारः, अभिमानिनः प्र. वि. ब. व. of विनेतृ-leader, अभिमानिन्-having high opinion of oneself, महत्त्वम् -importance, इच्छन्ति-तृ. पु. ब. व. of इच्छ्-इच्छति ६ ग. प. प., तत् -that & कुलम्-family/race /house both प्र. वि. ए. व., अवसीदति-वर्त. तृ. पु. ए. व. of अव+सद्- to perish, come to an end, (सद्-सीदति ६ ग. प. प. to sit, to recline, lie down)

लालयेत् पंच वर्षाणि, दश वर्षाणि ताडयेत् ।
प्राप्ते तु षोडशे वर्षे, पुत्रे मित्रवदाचरेत् ॥ ३५०॥ -चाणक्य नीति ३.१८

(पुत्रं) पंच वर्षाणि लालयेत्, दश वर्षाणि ताडयेत्, षोडशे वर्षे प्राप्ते तु पुत्रे मित्रवत् आचरेत् ॥

The son (child) is to be pampered till he becomes five years old, he is to be disciplined until he is ten years old, but when he reaches sixteen years of age, he is to be treated like a friend.

पञ्च, दश & वर्षाणि- प्र. वि. ब. व. of पञ्चन् -five, दशन् -ten & वर्ष-year, लालयेत्, ताडयेत्, आचरेत्-all विध्यर्थ प. प. तृ. पु. ए. व. of लल्- १ ग. प. प.-प्रायोजक-लालयति-ते- to fondle, play, caress, तड्-ताडयति-ते १० ग. उ. प. to beat, punish, discipline & आ+चर्- to observe, behave, practice-चर्-चरति १ ग. प. प. to walk, move, षोडशे, वर्षे, प्राप्ते, पुत्रे - all स. वि. ए. व. of षोडशन्-16, वर्ष-year, प्राप्त-reach, obtain-क. भू. धा. वि. of प्र+आप्-(आप्-आप्नोति ५ ग. प. प. to obtain, attain), पुत्र- son, child, मित्रवत्-like a friend- मित्र- a friend-वत्-adjctv- a prefix to noun indicates possession, similiarity
.

शत्रोः अपि गुणाः ग्राह्याः दोषाः वाच्याः गुरोः अपि।
सर्वथा सर्वयत्नेन पुत्रे शिष्ये हितं वदेत् ॥ ३५१ ॥ -महाभा. ४. ४१. १५

शत्रोः अपि गुणाः ग्राह्याः (भवन्ति)। गुरोः अपि दोषाः वाच्याः (भवन्ति)। पुत्रे शिष्ये सर्वयत्नेन सर्वथा, हितं वदेत्॥

Even enemies' virtues are to be accepted. Even teacher's faults are to be pointed out. In case of son and disciple, tell them what is beneficial with all efforts and at all times.

शत्रोः, गुरोः- both ष. वि. ब. व. of शत्रु-enemy, गुरु -teacher/elder, अपि-अव्यव-even, also, गुणाः, ग्राह्याः, दोषाः, वाच्याः- all प्र. वि. ब. व. of गुण-quality, virtue, ग्राह्य- grasped, accepted-(also ग्रहितव्य, ग्रहणीय, ग्रह्य- कर्मणि विध्यर्थ धा. सा. विशेषण of ग्रह्-गृह्णाति-गृह्णीते ९ ग. उ. प. to accept, hold, दोष-fault, shortcomings, वाच्य- spoken about.(also, वक्तव्य, वचनीय, वाक्य-कर्मणि विध्यर्थ धा. सा. विशेषण of वच्-वक्ति २ ग. प. प. to speak), पुत्रे & शिष्ये-स. वि. ए. व. of पुत्र-son, शिष्य-desciple, सर्वयत्नेन-तृ. वि. ए. व. of सर्वयत्न-all efforts, सर्वथा- अव्यव- by all means, at all times, हितं- beneficial, useful-क. भू. धा. वि. of हि-हिनोति-५ ग. प. प. to please, exhilarate, gratify, वदेत्-विध्यर्थ तृ. पु. ए. व. of वद्-वदति-to speak

यो ध्रुवाणि परित्यज्य ह्यध्रुवं परिसेवते।
ध्रुवाणि तस्य नश्यन्ति चाध्रुवं नष्टमेव तत् ॥३५२॥ -   चाणक्य नीति

यः, ध्रुवाणि परित्यज्य, अध्रुवम् हि परिसेवते, तस्य ध्रुवाणि नश्यन्ति। तत् अध्रुवम् नष्टम् एव च (अस्ति)॥

One who leaves something certain and goes after the uncertain, his certain things are lost. And that non certain is lost as well!

Similar to - A bird in hand is worth two in the bush.

यः - प्र. वि. ए. व. of यद्-who, ध्रुवाणि- न. लिं. द्वि. वि. ब. व. of ध्रुव-achievable, sure one, certain one, परित्यज्य-पू. का. वा. ल्यबन्त धा. सा. अव्यव of परि+त्यज्-leave, abandon (त्यज् -त्यजति १ ग. प. प. to leave), हि-अव्यव-surely, indeed, अध्रुवम् -न ध्रुवम्- नञ्तत्पुरुष स., परिसेवते- वर्त. तृ. पु. ए. व. of परि+सेव्-to attempt, go after-सेव्-सेवते १ ग. आ. प.- to serve,तस्य-ष. वि. ए. व. of तद् - he, नश्यन्ति--तृ. पु. ब. व. of नश्- नश्यति ४ ग. प. प.- to get destroyed, perish, तत् , अध्रुवम्, नष्टम् -प्र. वि. ए. व. of तद्-that, अध्रुव-not achievable, नष्ट-lost -क. भू. धा. वि. of नश्- नश्यति, एव- अव्यव- just, just so, च-and

सर्वनाशे समुत्पन्ने ह्यर्धं त्यजति पण्डितः।
अर्धेन कुरुते कार्यं सर्वनाशो हि दुःसहः ॥ ३५३ ॥

सर्वनाशे समुत्पन्ने पण्डितः अर्धम् हि त्यजति। (स) अर्धेन हि कार्यम् कुरुते। सर्वनाशः दुःसहः (भवति) ॥

When everything is about to be lost, the wise abandons half and gets his work done with other half. It is very hard to bear loosing everything.

सर्वनाशे & समुत्पन्ने-स. वि. ए. व. of सर्वनाश-destruction of entire thing-सर्वस्य नाशः उपपद तत्पुरुष स. & समुत्पन्न- occur, originate, spring up-क. भू. धा. वि. of सं+उद्+पद् (पद्-पद्यते ४ ग. आ. प. to to go, approach, attain), पण्डितः प्र. वि. ए. व. of पण्डित-wise, sensible person, त्यजति-वर्त. तृ. पु. ए. व. of त्यज्-त्यजति १ ग. प. प. to leave, abandon, अर्धम् -द्वि. वि. ए. व. & अर्धेन-तृ. वि. ए. व. of अर्ध-half, part, हि-अव्यव-surely, just, only कार्यम् -द्वि. वि. ए. व. of कार्य-(also-करणीय, कृत्य, कर्तव्य- कर्मणि विध्यर्थ धा. सा. वि. of कृ-करोति-कुरुते ८ ग. उ. प. to do, make, कुरुते-आ. प. तृ. पु. ए. व. of कृ), सर्वनाशः -see above & दुःसहः both प्र. वि. ए. व. of सर्वनाश & दुःसहः-unbearable -दुःखेन सहति इति-उपपद तत्पुरुष स.

अन्यक्षेत्रे कृतं पापं पुण्यक्षेत्रे विनश्यति |
पुण्यक्षेत्रे कृतं पापं वज्रलेपो भविष्यति ॥ ३५४ ॥ - महा सुभाषित संग्रह

अन्यक्षेत्रे कृतम् पापम् पुण्यक्षेत्रे विनश्यति। पुण्यक्षेत्रे कृतम् पापम् वज्रलेपः भविष्यति ॥

The sins committed at any place, get absolved at a holy place. (by doing the pilgrimage). But if one commits a sin at a holy place, its ill-effect is permanent (such sins never get absolved).

अन्यक्षेत्रे & पुण्यक्षेत्रे- स. वि. ए. व. of अन्यक्षेत्र-the other place-अन्यम् क्षेत्रम् & पुण्यक्षेत्र -holy place, pilgrim center-पुण्यम् क्षेत्रम् -both वि.पु.प.कर्मधारय ., कृतम् - done, committed -क. भू. धा. वि. of कृ-करोति-कुरुते ८ ग. उ. प. to do, पापम्- a sin, विनश्यति-वर्त. तृ. पु. ए. व. of वि+नश् to get absolved, destroyed (नश् -नश्यति ४ ग. प. प. to vanish, lost), वज्रलेपः प्र. वि. ए. व. of -वज्रलेप -a permanent coating- वज्रः इव लेपः - वि.पु.प.कर्मधारय स. -वज्र-diamond, thunderbolt लेप-coating, plastering, भविष्यति-सामान्य (द्वि) भविष्य तृ. पु. ए. व. of भू-भवति १ ग. प. प. to be, to exist

तावद् महतां महती यावत् किमपिहि न याच्यते लोकः।
बलिमनुयाचनसमये श्रीपतिरपि वामनो जातः ॥ ३५५ ॥

यावत् लोकः किम् अपि न याच्यते, तावत् हि महताम् महती (विद्यते)। बलिम् अनुयाचनसमये, श्रीपतिः अपि वामनः जातः।

So long as a person does not beg from anyone, his greatness remains intact. At the time of asking boons from Baliraja, even the Master of Wealth (विष्णु) had to become a dwarf (वामन).

यावत्-untill, as much as, & तावत्- -till that time, that much- both adjctvs, लोकः- प्र. वि. ए. व. of लोक-people, person, किम् -what, which, अपि-अव्यव-even, also, and, न -no, not, याच्यते-कर्मणि प्रयोग. वर्त. तृ. पु. ए. व. of याच् -याचते- १ ग. आ. प. to beg, solicit, हि-अव्यव-surely, indeed, महताम् -पु. लिं. ष. वि. ब. व. of महत्-great, noble, महती-(न. लिं.)- greatness, credibility, बलिम्-पु. लिं. द्वि. वि. ए. व. of बलि अनुयाचनसमये-स. वि. ए. व. of अनुयाचनसमय-at the time of begging, अनु-अव्यव-a prefix meaning-'near', 'after', 'along', याचन-begging, soliciting, समय-time, अनुयाचनस्य समयः-ष. तत्पुरुष स., श्रीपतिः, वामनः जातः all -पु. लिं. प्र. वि. ए. व. of श्रीपति-श्रियः पतिः-ष. तत्पुरुष स., (विष्णुः -लक्ष्मीपति-श्रीपति) वामन-dwarf, short, small & जात-became, happened-क. भू. धा. वि. of जन्-जायते ४ ग. आ. प. to become, be born, produced.

दुर्जनदूषितमनसां पुंसां सुजनेऽप्यविश्वासः।
बालः पायसदग्धो दध्यपि फूत्कृत्य भक्षयति ॥ ३५६ ॥

दुर्जनदूषितमनसाम् पुंसाम् सुजने अपि अविश्वासः (करोति)। पायसदग्धः बालः दधि अपि फूत्कृत्य भक्षयति ॥

A person, having his mind corrupted by a bad person, does not trust even a good person, just like a child having burnt with hot milk, eats even curd, after blowing it over!

दुर्जनदूषितमनसाम् & पुंसाम्- ष. वि. ब. व. of -दुर्जनदूषितमनस्- दुष्टः जनः-दुर्जनः -bad/wicked person वि.पु.प.कर्मधारय स., दूषित -corrupted, polluted- क. भू. धा वि. of प्रयोजक of दुष् -दोषयति-ते (दुष्यति ४ ग. प. प. to be defiled, be impure)- दुर्जनेन दूषितम्-दुर्जनदूषितम् -तृ. तत्पुरुष स., मनस् -न. लिं-mind, heart, दुर्जनदूषितम् मनस् - वि.पु.प.कर्मधारय स. & पुंस् - पु. लिं- a man, person, human, सुजने-स. वि. ए. व. of सुजन-good person-सु-अव्यव-a particle

used implying-good, excellent, जन-person, अपि-अव्यव-also, even, अविश्वासः - न विश्वास- नञ्तत्पुरुष स.-विश्वास-faith, belief, पायसम्- Kheer, milk pudding, दग्धः-burnt-क. भू. धा वि. of दह्-दहति १ ग. प. प. to burn- पायसेण दग्धः- पायसदग्धः -तृ. तत्पु.स. बालः -पु. लिं- child, दधि- न. लिं. -curd, फूत् (ind)- imitative sound of blowing फूत्कृत्य- पू. का. वा. ल्यबन्त धा. सा. अव्यव of फूत्+कृ- blowing by mouth, भक्षयति-१० ग. उ. प. of भक्ष्- to eat, to bite

दुर्बलस्य बलं राजा बालानां रोदनं बलम् ।
बलं मूर्खस्य मौनित्वं चौराणामनृतं बलम् ॥३५७॥ - चाणक्य नीति

राजा दुर्बलस्य बलम् (भवति)। रोदनम् बालानाम् बलम् (भवति)। मौनित्वम् मूर्खस्य बलम् (भवति)।अनृतम् चौराणाम् बलम् (भवति) ॥

The King is the strength of the weak (a poor subject). Crying is the strength of children. Keeping the mouth shut is the strength of a stupid person. Deception is the strength of thieves.

राजा-King, Ruler -पु. लिं. प्र. वि. ए. व. of राजन्, रोदनम्, मौनित्वम्, अनृतम् - all न. लिं. प्र. वि. ए. व. of रोदन-crying, मौनित्व- keeping silent-, अनृत-Deception, untruth - अन् ऋत - नञ्तत्पुरुष स.- ऋत -truth, दुर्बलस्य & मूर्खस्य-पु. लिं. ष. वि. ए. व. of दुर्बल-weak- बलम्- strength, दुर्-अव्यव-a prefix used in sense 'bad', 'weak', 'difficult', 'poor', बालानाम् & चौराणाम् -पु. लिं. ष. वि. ब. व. of बाल-child & चौर or चोर-thief, robber

न कस्यचित्कश्चिदिह स्वभावा-
द्भवत्युदारोऽभिमतः खलो वा ।
लोके गुरुत्वं विपरीततां वा
स्वचेष्टितान्येव नरं नयन्ति ॥३५८॥ -हितोपदेश

न कश्चित् स्वभावात् कस्यचित् उदारः, अभिमतः वा खलः भवति। इह लोके, स्वचेष्टितानि एव, नरं गुरुत्वम् वा विपरीतताम् नयन्ति॥

No one inherently becomes exalted, beloved or wicked to anyone else. In this world, one's own efforts alone take a person to greatness or otherwise.

न-no, not, कश्चित् (कः चित्)- someone, कस्यचित्-(कस्य चित्)- some one's, इह-अव्यव-here, स्वभावात्- पं. वि. ए. व. of स्वभाव-nature, inherent, उदारः-great, generous, अभिमतः-

beloved, agreeable, खलः-wicked- all in प्र. वि. ए. व., भवति-वर्त. तृ. पु. ए. व. of भू १ ग. प. प. to be, to exist, लोके- स. वि. ए. व. of लोक-world, गुरुत्वम् -(न. लिं.) द्वि. वि. ए. व. of गुरुत्व- greatness & विपरीतताम्- (स्त्री. लिं.) द्वि. वि. ए. व. of विपरीतता- being contrary, opposite, वा-अव्यव-or, and, स्वचेष्टितानि- प्र. वि. ब. व. of स्वचेष्टित- स्व-pronominal adjctv-one's own, चेष्टित- endeavour, effort-क. भू. धा. वि. of चष्ट्-चेष्टते- १ ग. आ. प. to be active, to make effort, endeavour, एव-अव्यव-only, alone, नरम्-पु. लिं. द्वि. वि. ए. व. of नर-man, person, नयन्ति- वर्त. तृ. पु. ब. व. of नी-नयति-ते १ ग. उ. प. to take, carry, conduct, bring

सेवा श्ववृत्तिराख्याता यैस्तैर्मिथ्या प्रजल्पितम् ।
स्वच्छन्दं चरति श्वाऽत्र सेवकः परशासनात् ॥ ३५९ ॥

यैः 'सेवा श्ववृत्तिः' (इति) आख्याता, तैः (तद्) मिथ्या प्रजल्पितम् (भवति)। अत्र श्वा स्वच्छन्दम् चरति, सेवकः परशासनात् (चरति) ॥

Those who said 'service is a dog's life' spoke incorrectly. Here, the dog moves freely as he likes, (but) the servant works under orders of others!

सेवा-service & श्ववृत्तिः - dog's life-both-स्त्री. लिं. प्र. वि. ए. व.(श्वन् -dog, वृत्ति- existence, being), यैः & तैः -तृ. वि. ब. व. of यद्- who & तद्-he, आख्याता--स्त्री. लिं.-Said, told- आख्यात- क. भू. धा. वि. of आ+ख्या-to tell, declare (ख्या-ख्याति २ ग. प. प. to tell, communicate) मिथ्या-अव्यय-falsely, incorrectly, wrongly प्रजल्पितम्- prattle, gossip- प्रजल्पित-क. भू. धा. वि. of प्र+जल्प् (जल्प् -जल्पति १ ग. प. प. to murmur, chatter, prattle), श्वा-पु. लिं. प्र. वि. ए. व. of श्वन् -dog, स्वच्छन्दम् -freely, independently (छन्द- desire, liking, will) चरति-वर्त. तृ. पु. ए. व. of चर्-१ ग. प. प. to move, go, roam (also means to graze) सेवकः -servant-पु. लिं. प्र. वि. ए. व., अत्र --अव्यय- here, in this respect, परशासनात्-पं. वि. ए. व. of परशासन-पर- other-शासन-order, command, पराणाम् शासनम् -ष. तत्पुरुष स.

न सा सभा यत्र न सन्ति वृद्धाः
वृद्धाः न ते ये न वदन्ति धर्मम्।
धर्मो न वै यत्र च नास्ति सत्यम्
सत्यं न तद्यच्छलेनानुविद्धम् ॥३६०॥ -महाभा. सभा. ५.३५. ५८

यत्र वृद्धाः न सन्ति, सा सभा न (अस्ति) । ये धर्मम् न वदन्ति, ते वृद्धाः न (सन्ति) । यत्र सत्यम् च न अस्ति, (सः) धर्मः न वै । यद् च छलेन अनुविद्धम् (अस्ति), तद् सत्यं न (अस्ति) ॥

That is not an assembly, where elders are not present. Those, who do not speak about right way of living, are not elders. And that indeed is not a good code of conduct, which does not contain the truth. And that is not a truth which is full of deceit.
सा, सभा-both स्त्री. लिं. प्र. वि. ए. व. of तद् - she & सभा- assembly, council, यत्र-अव्यय-where, वृद्धाः, ते & ये- पु. लिं. प्र. वि. ब. व. of वृद्ध- grown up, old- (क. भू. धा वि. of वृध्-वर्धते -१ ग. आ. प. to increase, grow), तद् he, that & यद्-who, न-no, not, सन्ति & वदन्ति-वर्त. तृ. पु. ब. व. of अस्-अस्ति २ ग. प. प. to be & वद्-वदति २ ग. प. प. to speak, धर्मम्-द्वि. वि. ए. व. & धर्मः- प्र. वि. ए. व. of धर्म- code of conduct, right way of living, वै -अव्यय- indeed, truly, अस्ति-वर्त. तृ. पु. ए. व. of अस्-अस्ति २ ग. प. प. to be, सत्यम् truth, तद्-that, it, यद्-which, what all in - न. लिं. प्र. वि. ए. व., च-and, छलेन- तृ. वि. ए. व. of छल-fraud, trick, deceit, अनुविद्धम्-overspread, full of, pierced-अनुविद्ध-क. भू. धा वि. of अनु+विध्- (विध्-विधति-६ ग. प. प. to pierce, cut-also means to honour, worship)

ॐ असतो मा सद्गमय। तमसो मा ज्योतिर्गमय। मृत्योर्माऽमृतं गमय।
ॐ शान्तिः शान्तिः शान्तिः॥३६१॥ -बृहदारण्यकोपनिषद् १. ३. २८

ॐ असतः मा सत् गमय। तमसः मा ज्योतिः गमय। मृत्योः मा अमृतम् गमय।
ॐ शान्तिः शान्तिः शान्तिः॥

(Oh God) lead me from the untruth to the truth, from the darkness to the light, from the death to immortality. Let my spiritual (आध्यात्मिक), material (आधिभौतिक) and natural (आधिदैविक) sufferings go away for a tranquil life.

आधिः - Mental pain, agony as opposed to व्याधिः - bodily pain. आत्मिक - related to आत्मा - the Self; Soul भौतिक - related to surroundings, physical, दैविक- related to fate, Nature, ॐ-अव्यय- a holy exclamation at the beginning and end of reading of मन्त्र, मा (माम्)- द्वि. वि. ए. व. of अस्मद्-I, we, असतः, तमसः & मृत्योः – all पं. वि. ए. व. of असत्- untruth (न सत्-नञ्तत्पुरुष स.), तमस्-(न. लि.) darkness, illusion, ignorance & मृत्यु- death, decease, सत् -truth, ज्योतिः-light, supreme spirit & अमृतम् -immortality, paradise, heaven, nectar of immortality- all प्र. वि. ए. व. of सत्-adjctiv-truth, reality, virtuous, ज्योतिस्-(न. लिं.) & अमृतम्--(न. लिं.),(this is Vedic Sanskrit; here grammatical rules of classic Sanskrit do not apply. These words, though they area प्र. वि. ए. व, they should be considered as च. वि. ए. व. -to), गमय- आज्ञार्थ द्वि. पु. ए. व. of प्रयोजक (causal) -गमयति-ते- to lead, to cause to go (गम्-गच्छति १ ग. प. प. to go), शान्तिः(स्त्री. लिं.)- Calmness, tranquility, quiet, peace